श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.16- तृतीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्‌भुत अनमोल उद्‌गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ षोडशोऽध्यायः॥**

### उद्धव उवाच

**त्वं(म्) ब्रह्म परमं(म्) साक्षा- दनाद्यन्तमपावृतम् ।**
**सर्वेषामपि भावानां(न्), त्राणस्थित्यप्ययोद्भवः ॥ 1॥**

**दना + द्यन्त +मपावृतम् ,त्राणस्+थित्यप्+ययोद्+भव:**

**उच्चावचेषु भूतेषु, दुर्ज्ञेयमकृतात्मभिः ।**
**उपासते त्वां(म्) भगवन्, याथातथ्येन ब्राह्मणाः ॥ 2॥**

**दुर्ज्ञेय+ मकृतात्+ मभि:**

**येषु येषु च भावेषु, भक्त्या त्वां(म्) परमर्षयः ।**
**उपासीनाः(फ्) प्रपद्यन्ते, सं(म्)सिद्धिं(न्) तद् वदस्व मे ॥ 3॥**

**परमर्+षय:**

गूढश्चरसि भूतात्मा,भूतानां(म्) भूतभावन ।
न त्वां(म्) पश्यन्ति भूतानि, पश्यन्तं(म्) मोहितानि ते ॥ 4॥

गूढश्+चरसि

याः(ख्) काश्च भूमौ दिवि वै रसायां(वँ),
विभूतयो दिक्षु महाविभूते ।
ता मह्यमाख्याह्यनुभावितास्ते,
नमामि ते तीर्थपदाङ्घ्रिपद्मम् ॥ 5॥

मह्य+ माख्या+ह्यनुभा+ वितास्ते , तीर्थ+ पदाङ्घ्रि+पद्मम्

श्रीभगवानुवाच

एवमेतदहं(म्) पृष्टः(फ्), प्रश्नं(म्) प्रश्नविदां(वँ) वर ।
युयुत्सुना विनशने, सपत्नैरर्जुनेन वै ॥ 6॥

सपत्नै + रर्+ जुनेन

ज्ञात्वा ज्ञातिवधं(ङ्) गर्ह्य- मधर्मं(म्) राज्यहेतुकम् ।
ततो निवृत्तो हन्ताहं(म्), हतोऽयमिति लौकिकः ॥ 7॥

राज्य+ हेतुकम्

स तदा पुरुषव्याघ्रो, युक्त्या मे प्रतिबोधितः ।
अभ्यभाषत मामेवं(यँ),यथा त्वं(म्) रणमूर्धनि ॥ 8॥

पुरुषव् + याघ्रो

अहमात्मोद्धवामीषां(म्),भूतानां(म्) सुहृदीश्वरः ।
अहं(म्) सर्वाणि भूतानि, तेषां(म्) स्थित्युद्भवाप्यय:।।9।।

अहमात् + मोद् +धवामीषां, स्थित्युद् + भवाप्यय:

अहं(ङ्) गतिर्गतिमतां(ङ्),कालः(ख्) कलयतामहम् ।
गुणानां(ञ्) चाप्यहं(म्) साम्यं(ङ्), गुणिन्यौत्पत्तिको गुणः ॥ 10॥

गुणिन्यौत् + पत्तिको

गुणिनाम*प्यहं(म्) सूत्रं(म्),महतां(ञ्) च महानहम् ।
सूक्ष्माणाम*प्यहं(ञ्) जीवो, दुर्जयानामहं(म्) मनः ॥ 11॥

सूक्ष्माणा+ मप्यहं

हि*रण्यगर्भो वेदानां(म्),मन्त्राणां(म्) प्रणवस्त्रिवृत् ।
अ*क्षराणामकारोऽस्मि, पदानि*च्छ*न्दसामहम् ॥ 12॥

प्रणवस् + त्रिवृत् ,पदानिच्+ छन्द+ सामहम्

इन्द्रोऽहं(म्) सर्वदेवानां(वँ), वसूनाम*स्मि ह*व्यवाट् ।
आदि*त्यानामहं(वँ) वि*ष्णू, रु*द्राणां(न्) नीललोहितः ॥ 13॥

वसूना+ मस्मि

ब्रह्मर्षीणां(म्) भृगुरहं(म्), राजर्षीणामहं(म्) मनुः ।
देवर्षीणां(न्) नारदोऽहं(म्), हविर्धान्य*स्मि धेनुषु ॥ 14॥

राजर्षी+ णामहं(म्), हविर्+ धान्यस्मि

सि*द्धेश्वराणां(ङ्) कपिलः(स्), सुपर्णोऽहं(म्) पतत्त्रिणाम् ।
प्रजापतीनां(न्) द*क्षोऽहं(म्), पितृणामहमर्यमा ॥ 15॥

सिद्धेश्+ वराणां(ङ्), पतत्+ त्रिणाम् , पितृणा+ महमर्+ यमा

मां(वँ) विद्ध्यु*द्धव दैत्यानां(म्),प्रह्लादमसुरेश्वरम् ।
सोमं(न्) न*क्ष*त्रौषधीनां(न्), धनेशं(यँ) य*क्षर*क्षसाम् ॥ 16॥

विद् + ध्युद् + धव ,प्रह्ला+ दम+ सुरेश्वरम्

ऐरावतं(ङ्) गजेन्द्राणां(यँ), यादसां(वँ) वरुणं(म्) प्रभुम् ।
तपतां(न्) द्यमतां(म्) सूर्यं(म्), मनु*ष्याणां(ञ्) च भूपतिम् ॥ 17॥

उच्चैः(श्)श्रवास्तुरं(ङ्)गाणां(न्), धातूनाम*स्मि कां(ञ्)चनम् ।
यमः(स्) सं(यँ)यमतां(ञ्) चाहं(म्), सर्पाणाम*स्मि वासुकिः ॥ 18॥

उच्चैः(श्)+ श्रवास् +तुरं(ङ्)+ गाणां(न्)

नागेन्द्राणामनन्तोऽहं(म्),मृगेन्द्रः(श्) शृं(ङ्)गिदं(म्)ष्ट्रिणाम् ।
आश्रमाणामहं(न्) तुर्यो, वर्णानां(म्) प्रथमोऽनघ ॥ 19॥

नागेन्द्राणा+ मनन्तोऽहं(म्), शृं(ङ्)गि+ दं(म्)ष्ट्रिणाम्

तीर्थानां(म्) स्रोतसां(ङ्) गङ्गा, समुद्रः(स्) सरसामहम् ।
आयुधानां(न्) धनुरहं(न्), त्रिपुरघ्नो धनुष्मताम् ॥ 20॥

त्रिपु+ रघ्नो

धिष्ण्यानामस्म्यहं(म्) मेरुर्- गहनानां(म्)हिमालयः ।
वनस्पतीनामश्वत्थ, ओषधीनामहं(यँ) यवः ॥ 21॥

धिष्ण्या+ नामस्+ म्यहं(म्), वनस्पतीना+ मश्वत्थ

पुरोधसां(वँ) वसिष्ठोऽहं(म्), ब्रह्मिष्ठानां(म्) बृहस्पतिः ।
स्कन्दोऽहं(म्) सर्वसेनान्या- मग्रण्यां(म्) भगवानजः ॥ 22॥

ब्रह्मिष्+ ठानां(म्)

यज्ञानां(म्) ब्रह्मयज्ञोऽहं(वँ), व्रतानामविहिं(म्)सनम् ।
वाय्वग्न्यर्काम्बुवागात्मा, शुचीनामप्यहं(म्) शुचिः ॥ 23॥

व्रताना+ मविहिं(म्)+ सनम्, वाय् +वग्न्यर्+ काम्बुवा+ गात्मा, शुचीना+ मप्यहं(म्)

योगानामात्मसं(म्)रोधो, मन्त्रोऽस्मि विजिगीषताम् ।
आन्वीक्षिकी कौशलानां(वँ), विकल्पः(ख्) ख्यातिवादिनाम् ॥ 24॥

योगाना+मात्म+सं(म्)रोधो, विजिगी+ षताम्

स्त्रीणां(न्) तु शतरूपाहं(म्),पुं(म्)सां(म्) स्वायम्भुवो मनुः ।
नारायणो मुनीनां(ञ्) च, कुमारो ब्रह्मचारिणाम् ॥ 25॥

शत+ रूपाहं(म्)

धर्माणामस्मि सं(न्)न्यासः, क्षेमाणामबहिर्मतिः ।
गुह्यानां(म्) सूनृतं(म्) मौनं(म्), मिथुनानामजस्त्वहम् ॥ 26॥

क्षेमाणा+ मबहिर्+ मतिः,मिथुनाना+ मजस्+त्वहम्,

सं(वँ)वत्सरोऽस्म्यनिमिषा- मृतूनां(म्) मधुमाधवौ ।
मासानां(म्) मार्गशीर्षोऽहं(न्), नक्षत्राणां(न्) तथाभिजित् ॥ 27॥

संवत्सरोऽस्+म्यनिमिषा

अहं(म्) युगानां(ञ्) च कृतं(न्), धीराणां(न्) देवलोऽसितः ।
द्वैपायनोऽस्मि व्यासानां(ङ्), कवीनां(ङ्) काव्य आत्मवान् ॥ 28॥

द्वैपा+ यनोऽस्मि

वासुदेवो भगवतां(न्), त्वं(न्) तु भागवतेष्वहम् ।
किं(म्)पुरुषाणां(म्) हनुमान्, विद्याध्राणां(म्) सुदर्शनः ॥ 29॥

भागवतेष् + वहम्

रत्नानां(म्) पद्मरागोऽस्मि, पद्मकोशः(स्) सुपेशसाम् ।
कुशोऽस्मि दर्भजातीनां(ङ्), गव्यमाज्यं(म्) हविः(ष्)ष्वहम् ॥ 30॥

पद्म+ रागोऽस्मि

व्यवसायिनामहं(म्) लक्ष्मीः(ख्), कितवानां(ञ्) छलग्रहः ।
तितिक्षास्मि तितिक्षूणां(म्), सत्त्वं(म्) सत्त्ववतामहम् ॥ 31॥

व्यवसा+ यिनामहं(म्), सत्त्व+ वतामहम्

ओजः(स्) सहो बलवतां(ङ्),कर्माहं(वँ) विद्धि सात्त्वताम् ।
सात्त्वतां(न्) नवमूर्तीना- मादिमूर्तिरहं(म्) परा ॥ 32||

मादि+ मूर्ति+ रहं(म्)

विश्वावसुः(फ्) पूर्वचित्तिर्-गन्धर्वाप्सरसामहम् ।
भूधराणामहं(म्) स्थैर्यं(ङ्), गन्धमात्रमहं(म्) भुवः ॥ 33॥

गन्धर्+वाप्+सरसामहम् , गन्धमात्र+ महं(म्)

अपां(म्) रसश्च परमस्- तेजिष्ठानां(वँ) विभावसुः ।
प्रभा सूर्येन्दुताराणां(म्),शब्दोऽहं(न्) नभसः(फ्) परः ॥ 34॥

सूर्येन्दु+ ताराणां(म्)

ब्रह्मण्यानां(म्) बलिरहं(वँ), वीराणामहमर्जुनः ।
भूतानां(म्) स्थितिरुत्पत्ति- रहं(वँ) वै प्रतिसङ्क्रमः ॥ 35॥

वीराणा+ महमर्जुनः,

स्थिति+ रुत्पत्ति

गत्युक्त्युत्सर्गोपादान- मानन्दस्पर्शलक्षणम् ।
आस्वादश्रुत्यवघ्राण- महं(म्) सर्वेन्द्रियेन्द्रियम् ॥ 36॥

गत् +युक् + त्युत् +सर्गोपादान,

मानन्द+स्पर्श+लक्षणम्

पृथिवी वायुराकाश, आपो ज्योतिरहं(म्) महान् ।
विकारः(फ्) पुरुषोऽव्यक्तं(म्), रजः(स्) सत्त्वं(न्) तमः(फ्) परम् ।।37।।

ज्योति+ रहं(म्)

अहमेतत्प्रसं(ङ्)ख्यानं(ञ्), ज्ञानं(न्) तत्त्वविनिश्चयः ।
मयेश्वरेण जीवेन, गुणेन गुणिना विना ।
सर्वात्मनापि सर्वेण, न भावो विद्यते क्वचित् ॥ 38॥

अह+ मेतत्+प्रसं(ङ्)ख्यानं(ञ्), सर्वात्+ मनापि

सं(ङ्)ख्यानं(म्) परमाणूनां(ङ्), कालेन क्रियते मया ।
न तथा मे विभूतीनां(म्), सृजतोऽण्डानि कोटिशः ॥ 39॥

सृजतोऽण् + डानि

तेजः(श्) श्रीः(ख्) कीर्तिरैश्वर्यं(म्), ह्रीस्त्यागः(स्) सौभगं(म्) भगः ।
वीर्यं(न्) तितिक्षा विज्ञानं(यँ), यत्र यत्र स मेंऽ(म्)शकः ॥ 40||

कीर्ति+रैश्वर्यं(म्), ह्रीस्+ त्यागः(स्)

एतास्ते कीर्तिताः(स्) सर्वाः(स्), सं(ङ्)क्षेपेण विभूतयः ।
मनोविकारा एवैते, यथा वाचाभिधीयते ॥ 41॥

वाचा+ भिधीयते

वाचं(यँ) यच्छ मनो यच्छ, प्राणान् यच्छेन्द्रियाणि च ।

आत्मानमात्मना यच्छ, न भूयः(ख्) कल्पसेऽध्वने ॥ 42॥

यच्छेन् + द्रियाणि, आत्मा+ नमात्मना

यो वै वाङ्मनसी सम्य- गसं(यँ)यच्छन् धिया यतिः ।

तस्य व्रतं(न्) तपो दानं(म्),स्त्रवत्यामघटाम्बुवत् ॥ 43||

स्त्रवत्या+ मघटाम्+ बुवत्

तस्मान्मनोवचः(फ्)प्राणान्, नियच्छेन्मत्परायणः ।

मद्भक्तियुक्तया बुद्ध्या, ततः(फ्) परिसमाप्यते ॥ 44॥

तस्मान्+ मनोवचः(फ्)+ प्राणान्,

नियच्छेन्+ मत्परायणः, मद्भक्ति+ युक्तया

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायामेकादशस्कन्धे षोडशोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

